पञ्चासेन मुच्यते भ्रूणहत्यया" भा॰व॰८१अध्याये स्थितम्

**कुमारपालन** पु॰ कुमारेण पाल्यते कर्म्मणि पालि—ल्युट्। शालिवाहने १नृपे हेमच॰। कुमारं पालयति पालि+ल्यु उप॰स॰। २बालकपालके त्रि॰।

**कुमारभृत्या** स्त्री भृ—क्यप् भृत्या भरणम् ६त॰। कुमाररक्षणोपायभूते सुश्रुतोक्ते कौमारभृत्याख्ये कौमारतन्त्रे। कुमारभृत्या अधिकृत्यम् प्रवृत्तं तन्त्रम् अण्। कौमारभृत्य कुमाररक्षणोपायज्ञापके तच्छास्त्रांशे। "शल्यं शालक्यं कायचिकित्सा भूतविद्या कौमारभृत्येत्यादिना अष्टधा शास्त्रं विभज्य तल्लक्षणमुक्तं तत्रैव यथा

"कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम्।

विवृतमुत्तरत्र तत्रैव यथा

"नवग्रहाकृतिज्ञानं स्कन्दस्य च निषेधनम्। अपस्मारशकुन्योश्च रेवत्याश्च पुनः पृथक्। पूतनायास्तथान्धाया मण्डिका शीतपूतना। नैगमेयचिकित्सा च ग्रहोत्पत्तिः सयोनिजा। कौमारतन्त्रमित्येतच्छारीरेषु च कीर्त्तितम्"।

तत्प्रकारस्तत्रैव उत्तरतन्त्रे दर्शितो यथा

"अथातो नवग्रहाकृतिविज्ञानीयमध्यायं व्याख्यास्यामः। बालग्रहाणां विज्ञानं साधनञ्चाप्यनन्तरम्। उत्पत्तिं कारणञ्चैव सुश्रुतैकमनाः शृणु। १स्कन्दग्रहस्तु प्रथमः २स्कन्दापस्मार एवच। ३शकुनी ४रेवती चैव ५पूतना चान्धपूतना ६। पूतना ७शीतनामा च तथैव ८मुखमण्डिका। नवमो ९नैगमेयश्च यः पितृग्रहसंज्ञितः। धात्रीमात्रोःप्राक् प्रदिष्टापचाराच्छौचभ्रष्टान्मङ्गलाचारहीनान्। त्रस्तान् हृष्टांस्तर्ज्जितान् क्रन्दितान्वा पूजाहेतोर्हिंस्युरेते कुमारान्। ऐश्वर्य्यस्थास्ते न शक्या विशन्तो देहं द्रष्टुं मानुषैर्विश्वरूपाः। आप्तं वाक्यं तत्समीक्ष्याभिधास्ये लिङ्गान्येषां यानि देहे भवन्ति। शूनाक्षः क्षतजसगन्धिकः स्तनद्विड्वक्राक्षो हृतचलितैकपक्ष्मनेत्रः। उद्विग्नः सुलुलितचक्षुरल्परोदी स्कन्दार्त्तो भवति च गाढमुष्टिवर्चाः १। निःसंज्ञो भवति पुनर्भवेद्धि संज्ञः संरब्धः करचरणैश्च नृत्यतीव। विण्मूत्रे सृजति विनद्य जृम्भमाणः फेनञ्च प्रसृजति तत्सखाभिपन्नः २। त्रस्ताङ्गो भयचकितो विहङ्गगन्धिः संस्राविव्रणपरिपीडितः समन्तात्। स्फोटैश्च प्रतततनुः सदाहपाकैर्विज्ञेयो भवति शिशुः क्षतः शकुन्या ३। रक्ताक्षो हरितमलोऽतिपाण्डुदेहः श्यावो वा ज्वरमुखपाकवेदनार्त्तः। रेवत्या४ व्यथिततनुश्च कर्णनासं मृद्नाति ध्रुवमभिपीडितः कुमारः। स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ विड्भिन्नं सृजति च काकतुल्यगन्धिः। छर्द्यार्त्तो हृषिततनूरुहः कुमारस्तृष्णालुर्भवति च पूतनागृहीतः ५। यो द्वेष्टि स्तनमतिसारकासहिक्काच्छर्दीभिर्ज्वरसहिताभिरर्द्यमानः। दुर्वर्णः सततमधःशयोऽम्लगन्धिस्तं ब्रूयुर्भिषजोऽन्धपूतनार्त्तम्६। उद्विग्नो भृशमतिवेपते प्ररुद्यात् संलीनः स्वपिति च यस्य चान्त्रकूजः। विस्राङ्गो भृशमतिसार्य्यते च यस्तं जानीयाद्भिषगिह शीतपूतनार्त्तम्७। म्लानाङ्गः सुरुचिरपाणिपादवक्त्रो बह्वाशी कलुषसिरावृतोदरो यः। सोद्वेगो भवति च मूत्रतुल्यगन्धिः स ज्ञेयः शिशुरथ वक्त्रमण्डिकार्त्तः ८। यः फेनं वमति विनम्यते च मध्ये सोद्वेगं विलपति चोर्द्ध्वमीक्षमाणः। जीर्य्येत प्रततमथो वसासगन्धिर्निःसंज्ञो भवति हि नैगमेयजुष्टः ९। प्रस्तब्धो यः स्तनद्वेषी मुह्यते चाविशन्मुहुः। तं बालं न चिराद्धन्ति ग्रहः सम्पूर्णलक्षणः। विरीतमतःसाध्यं चिकित्सेदचिरार्दितम्। गृहे पुराणहविषाभ्यज्य बालं शुचौ शुचिः। सर्षपान् प्रकिरेत्तेषां तैलैर्दीपञ्च कारयेत्। सदा सन्निहितञ्चापि जुहुयाद्धव्यवाहनम्। सर्वगन्धौषधीबीजैर्गन्धमाल्यैरलङ्कृतम्। अग्नये कृत्तिकाभ्यश्च स्वाहा स्वाहेति संस्मरन्। नमः स्कन्दाय देवाय ग्रहाधिपतये नमः। शिरसा त्वाभिवन्देऽहं प्रतिगृह्णीष्व मे बलिम्। नीरुजो निर्विकारश्च शिशुर्मे जायतां ध्रुवम्।

अथातः स्कन्दग्रहप्रतिषेधं व्याख्यास्यामः। स्कन्दग्रहोपसृष्टानां कुमाराणाञ्च शस्यते। वातघ्नद्रुमपत्राणां निःक्वाथः परिषेचने। तेषां मूलेषु सिद्धञ्च तैलमभ्यञ्जने हितम्। सर्वगन्धसुरामण्डकैटर्य्यैश्चापमिष्यते। देवदारुणि रास्नायां मधुरेषु द्रुमेषु च। सिद्धं सर्पिश्च सक्षीरं पानमस्मै प्रयोजयेत्। सर्षपाः सर्पनिर्म्मोको वचा काकादनी घृतम्। उष्ट्राजाविगवाञ्चैव रोमाण्युद्धूपनं शिशोः। सोमवल्लीमिन्द्रवल्लीं शमीं विल्वस्य कण्टकान्। मृगादन्याश्च मूलानि ग्रथितान्येव धारयेत्। रक्तानि माल्यानि तथा पताका रक्ताश्च गन्धा विविधाश्च भक्ष्याः। घण्टा च देवाय बलिर्निवेद्यः सकुक्कुटः स्कन्दगृहे हिताय। स्नानं त्रिरात्रं निशि चत्वरेषु कुर्य्यात्पुनः शालियवैर्न्नवैस्तु। अङ्गस्य गायत्र्यभिमन्त्रिताभिः प्रज्वालनं चाहुतिभिश्च वह्नेः। रक्षामतः प्रवक्ष्यामि बालानां पाप-